# READING - ९

कैकेयीवचनं श्रुत्वा महाराजो महावज्रहतवृक्ष इव पतितो भूमितले । सेवकैः संज्ञां कथमपि प्रापितः सो ऽवदत् । भरतमातस्तादृशं क्रूरकर्म मा क्रियताम् । ज्येष्ठपुत्रो वनं मा गच्छतु । यदि मम सुकुमारसुतो घोरारण्यं गच्छति तर्ह्यहं यमसदनमचिराद्गच्छामीति । किंतु सा राजपत्नी शोकाकुलस्य राज्ञः करुणवचनं श्रुत्वा केवलमहसदवदच्च । भो धर्मज्ञराज । पूर्वं स्वयं प्रतिज्ञाते वरे ऽधुना कथं विचारः । अस्मद्वंशे तन्न कदापि क्रियत इति । पुनः पुनर्निषण्णो नृपस्तच्चित्तपरिवर्तने प्रयत्नातिशयमकरोत् । अन्ततः स धर्मजालबद्धनृपो भवतु पापे मत्पुत्रो राम आहूयतामित्युक्त्वा पुनस्तीक्ष्णशरहतखगवद्धरातले पतति स्म ॥

---

*वद् (वत्)—at end of word = इव.